# ga NgAShTakam 2 by Kalidasa

# ગઙ્ગાષ્ટકમ્ ૨ કાલિદાસકૃતમ્

## Document Information

Text title : gangAShTakam kAlidAsavirachitaM

File name : gangAShTakamkAlidAsa2.itx

Category : aShTaka, devii, nadI, kAlidAsa, devI

Location : doc_devii

Author : Kalidas

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com

Latest update : May 4, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

ga NgAShTakam 2 by Kalidasa

# ગઙ્ગાષ્ટકમ્ ૨ કાલિદાસકૃતમ્

શ્રીગણેશાય નમઃ ॥

કત્યક્ષીણિ કરોટયઃ કતિ કતિ દ્વીપિદ્વિપાનાં ત્વચઃ
કાકોલાઃ કતિ પન્નગાઃ કતિ સુધાધામ્નશ્ચ ખણ્ડા કતિ ।
કિં ચ ત્વં ચ કતિ ત્રિલોકજનનિત્વદ્વારિપૂરોદરે
મજ્જજ્જન્તુકદમ્બકં સમુદયત્યેકૈકમાદાય યત્ ॥ ૧॥

દેવિ ત્વત્પુલિનાઙ્ગણે સ્થિતિજુષાં નિર્માનિનાં જ્ઞાનિનાં
સ્વલ્પાહારનિબદ્ધશુદ્ધવપુષાં તાર્ણં ગૃહં શ્રેયસે ।
નાન્યત્ર ક્ષિતિમણ્ડલેશ્વરશતૈઃ સંરક્ષિતો ભૂપતેઃ
પ્રાસાદો લલનાગણૈરધિગતો ભોગીન્દ્રભોગોન્નતઃ ॥ ૨॥

તત્તત્તીર્થગતૈઃ કદર્થનશતૈઃ કિં તૈરનર્થાશ્રિતૈ-
ર્જ્યોતિષ્ટોમમુખૈઃ કિમીશવિમુખૈર્યજ્ઞૈરવજ્ઞાહ્તૈ ।

સૂતે કેશવવાસવાદિવિબુધાગારાભિરામાં શ્રિયં ગઙ્ગે
દેવિ ભવત્તટે યદિ કુટીવાસઃ પ્રયાસં વિના ॥ ૩॥

ગઙ્ગાતીરમુપેત્ય શીતલશિલામાલમ્બ્ય હેમાચલીં
યૈરાકર્ણિ કુતૂહલાકુલતયા કલ્લોલકોલાહલઃ ।
તે શ ૃણ્વન્તિ સુપર્વપર્વતશિલાસિંહાસનાધ્યાસનાઃ
સઙ્ગીતાગમશુદ્ધસિદ્ધરમણીમંજીરધીરધ્વનિમ્ ॥ ૪॥

દૂરં ગચ્છ સકચ્છગં ચ ભવતો નાલોકયામો
મુખં રે પારાક વરાક સાકમિતરૈર્નાકપ્રદૈર્ગમ્યતામ્ ।
સદ્યઃ પ્રોદ્યતમન્દમારુતરજઃપ્રાપ્તા  કપોલસ્થલે
ગઙ્ગામ્ભઃકણિકા વિમુક્તગણિકાસઙ્ગાય સમ્ભાવ્યતે ॥ ૫॥

વિષ્ણોઃ સઙ્ગતિકારિણી હરજટાજૂટાટવીચારિણી
પ્રાયશ્ચિત્તનિવારિણી જલકણૈઃ પુણ્યૌઘવિસ્તારિણી ।

ભૂભૃત્કન્દરદારિણી નિજજલે મજ્જજ્જનોત્તારિણી
શ્રેયઃ સ્વર્ગવિહારિણી વિજયતે ગઙ્ગા મનોહારિણી ॥ ૬॥

વાચાલં વિકલં ખલં શ્રિતમલં કામાકુલં વ્યાકુલં
ચાણ્ડાલં તરલં નિપીતગરલં દોષાવિલં ચાખિલમ્ ।
કુમ્ભીપાકગતં તમન્તકકરાદાકૃષ્ય કસ્તારયેન્-
માતર્જહ્નુનરેન્દ્રનન્દિનિ તવ સ્વલ્પોદબિન્દું વિના ॥ ૭॥

શ્લેષમશ્લેષણયાનલેઽમૃતબિલે શાકાકુલે વ્યાકુલે
કણ્ઠે ઘર્ઘરઘોષનાદમલિને કાયે ચ સમ્મીલતિ ।
યાં ધ્યાયન્નપિ ભારભઙ્ગુરતરાં પ્રાપ્નોતિ મુક્તિં નરઃ
સ્નાતુશ્ચેતસિ જાહ્નવી નિવસતાં સંસારસન્તાપહૃત્ ॥ ૮॥

ઇતિ શ્રીમત્કાલિદાસવિરચિતં ગઙ્ગાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

*ga NgAShTakam 2 by Kalidasa*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*